## चतुर्थः पाठः

# विश्वकविः रवीन्द्रः

**(विश्वकवि रवीन्द्र)**

*[अंग्रेजी के शेक्सपीयर की तरह, संस्कृत के कालिदास की तरह और हिन्दी के तुलसीदास की तरह बँगला साहित्य में कवीन्द्र रवीन्द्रनाथ टैगोर का स्थान है। इनका जन्म 7 मई, सन् 1861 ई० को कोलकाता के एक समृद्ध ब्राह्मण परिवार में हुआ था। इनके पिता देवेन्द्रनाथ तथा माता शारदा देवी थीं। इनकी प्रारम्भिक शिक्षा घर में ही हुई। बाल्यकाल से ही इन्हें प्रकृति से प्रेम था। साहित्य और संगीत में भी रवीन्द्र को बचपन से ही अभिरुचि थी। इन्होंने अनेक कहानियाँ, कविता, उपन्यास और नाटक लिखे। इनकी प्रसिद्ध रचना 'गीताञ्जलि' है, जिसने रवीन्द्र को विश्वविख्यात 'नोबेल पुरस्कार' से सम्मानित कराया। गाँधीजी इन्हें गुरु का सम्मान देते थे। 7 अगस्त, 1941 को इनका देहान्त हुआ। इन्हें हमारे राष्ट्र-गान 'जन गण मन' के रचनाकार होने का गौरव प्राप्त है।]*

आङ्ग्लवाङ्मये काव्यधनः शेक्सपियर इव, संस्कृतसाहित्ये कविकुलगुरुः कालिदास इव, हिन्दीसाहित्ये महाकवितुलसीदास इव बङ्गसाहित्ये कवीन्द्रो रवीन्द्रः केनाविदितः स्यात्। आधुनिकभारतीयशिल्पिषु रवीन्द्रस्य स्थानं महत्त्वपूर्णमास्ते इति सर्वैः ज्ञायत एव। तस्य बहूनि योगदानानि पार्थक्येन वैशिष्ट्यं लभन्ते। न केवलमाध्यात्मिक-सांस्कृतिकक्षेत्रेषु तस्य योगदानं महत्त्वपूर्णमपि तु रचनात्मकसाहित्यकारतयापि तस्य नाम लोकेषु सुविदितमेव सर्वैः।

**सांस्कृतिक क्षेत्रे**

संगीतविधासु नृत्यविधासु च सः नूतनां शैलीं प्राकटयत्। सा शैली 'रवीन्द्र संगीत' नाम्ना ख्यातिं लभते। एवं नृत्यविधासु परम्परागतशैलीमनुसरताऽनेन शिल्पिना नवीना नृत्यशैली आविष्कृता।

अन्यक्षेत्रेष्वपि शिक्षाविद्रूपेण नवीनानां विचाराणां सूत्रपातो विहितः। तेषां प्रयोगात्मकविचाराणां पुञ्जीभूतः निरुपमः प्रासादः 'विश्व-भारती' रूपेण सुसज्जितशिरस्कः राजते। यत्र आश्रमशैल्याः नवीनशैल्या साकं समन्वयो वर्तते। दीनानां दलितवर्गाणां दशासुधारकरूपेणाऽसौ अस्माकं भारतीयानां पुरः प्रस्तुतोऽभवत्।

रवीन्द्रनाथस्य जन्म कलिकातानगरे एकषष्ट्यधिकाष्टादशशततमे ख्रिष्टाब्दे मईमासस्य सप्तमे दिवसे (7 मई, 1861) अभवत्। अस्य जनकः देवेन्द्रनाथः, जननी शारदा देवी चास्ताम्। रवीन्द्रस्य जन्म एकस्मिन् सम्भ्रान्ते समृद्धे ब्राह्मणपरिवारे जातम्। यस्य सविधे अचला विशाला सम्पत्तिरासीत्। अतो भृत्यबहुलं भृत्यैः परिपुष्टं संरक्षितं जीवनं वन्दिपूर्णमन्वभवत्। अतः स्वच्छन्दविचरणाय, क्रीडनाय सुलभोऽवकाशः नासीत्तेन मनः खिन्नमेवास्त।

वैभवशालिभवनस्य पृष्ठभागे एकं कमनीयं सरः आसीत्। यस्य दक्षिणतटे नारिकेलतरूणां पङ्क्तिः राजते स्म। पूर्वस्मिन् तटे जटिलस्तपस्वी इव महान् जीर्णः पुरातनः एकः वटवृक्षोऽनेकशाखासम्पन्नोऽन्तरिक्षं परिमातुमिव समुद्यतः आसीत्।

भवनस्य वातायने समुपविष्टः बालकः दृश्यमिदं दर्शं दर्शं परां मुदमलभत। अस्मिन्नेव सरसि तत्रत्याः निवासिनः यथासमयं स्नातुमागत्य स्नानञ्च कृत्वा यान्ति स्म। तेषां परिधानानि विविधाः क्रियाश्च दृष्ट्वा बालः किञ्चितकालं प्रसन्नः अजायत। मध्याह्नात् पश्चात् सरोवरः शून्यतां भजति स्म। सायं पुनः बकाः हंसाः जलकुक्कवाकवः विहंगाः कोलाहलं कुर्वाणाः स्थानानि लभन्ते स्म। तस्मिन् काले इदमेव कम्रं सरः बालकस्य मनोरञ्जनमकरोत्।

**शिक्षा**

रवीन्द्रस्य प्राथमिकी शिक्षा गृहे एव जाता। शिक्षणं बङ्गभाषायां प्रारभत। प्रारम्भिकं विज्ञानम् , संस्कृतम्,

गणितमिति त्रयो पाठ्यविषयाः अभूवन्। प्रारम्भिकगृहशिक्षायां समाप्तायां बालकः उत्तरकलिकातानगरस्य ओरिएण्टल सेमिनार विद्यालये प्रवेशमलभत्। तदनन्तरं नार्मलविद्यालयं गतवान् परं कुत्रापि मनो न रमते स्म। सर्वत्र अध्यापकानां स्वेच्छाचरणं सहपाठिनां तुच्छा रुचीः अप्रियान् स्वभावांश्च विलोक्य मनो न रेमे। अतः शून्यायां घटिकायां मध्यावकाशेऽपि च ऐकान्तिकं जीवनम् बालकाय रोचते स्म। बालकस्य मनः विद्यालयेषु न रमते इति विचिन्त्य जनको देवेन्द्रनाथः त्रिसप्तत्यधिकाष्टादशशततमे ख्रिष्टाब्दे (1873) सूनोरुपनयनसंस्कारं विधाय तं स्वेन सार्धमेव हिमालयमनयत्। तत्र पितुः सम्पर्केण बालकस्य मनः स्वच्छतामभजत्। तत्रत्यस्य भवनस्य पृष्ठभागे हिमाच्छादिताः पर्वतश्रेणयः आसन्। भवनाभिमुखं शोभनानि सुशाद्वलानि क्षेत्राणि राजन्ते स्म। अत्रत्यं प्राकृतिकं जीवनं बालकस्य मनो नितरामरमयत्। जनको देवेन्द्रनाथः प्रतिदिवसं नवीनया पद्धत्या पाठयति स्म। पितुः पाठनशैली बालकाय रोचते स्म। कालान्तरं हिमालयात् प्रतिनिवृत्य पुनः विद्यालयीयां शिक्षां लेभे।

सप्तदशवर्षदेशीयो रवीन्द्रनाथः अष्टसप्तत्यधिकाष्टादशशततमे ईस्वीयाब्दे सितम्बरमासे भ्रात्रा न्यायाधीशेन सत्येन्द्रनाथेन सार्धं विधिशास्त्रमध्येतुं लन्दननगरं गतवान्। दैवयोगाद् रवीन्द्रस्य बैरिस्टरपदवी पूर्णतां नागात्। सः पितुराज्ञया भ्रात्रा सत्येन्द्रनाथेन साकम् अशीत्यधिकाष्टादशशततमे ईस्वीयाब्दे (1880) फरवरीमासे लन्दननगरात् कलिकातानगरमायातः। इंग्लैण्डदेशस्य वर्षद्वयावासे पाश्चात्यसंगीतस्य सम्यक् परिचयस्तेन लब्धः।

**साहित्यिकप्रतिभायाः विकासः**

रवीन्द्रस्य साहित्यिकरचनायां नैसर्गिकी नवनवोन्मेषशालिनी प्रतिभा तु प्रधानकारणमासीदेव। परं तत्रत्या पारिवारिकपरिस्थितिरपि विशिष्टं कारणमभूत्। यथा– गृहे प्रतिदिनं साहित्यिकं वातावरणं कलासाधनायाः गतिविधयः, नाटकानां मञ्चनानि, संगीतगोष्ठ्यः, चित्रकलानां प्रदर्शनानि, देशसेवाकर्माणि सदैव भवन्ति स्म। किशोरावस्थायामेव रवीन्द्रः अनेकाः कथाः निबन्धाश्च लिखित्वा पारिवारिकपत्रिकासु भारती-साधना-तत्वबोधिनीषु मुद्रयति स्म।

तेन च शैशवसंगीतम्, सान्ध्यसंगीतम्, प्रभातसंगीतम्, नाटकेषु– रुद्रचण्डम्, वाल्मीकिप्रतिभागीतिनाट्यम्, विसर्जनम्, राजर्षिः चोखेरवाली, चित्राङ्गदा, कौड़ी ओकमलः, गीताञ्जलिः इत्यादयो बहवः ग्रन्थाः विरचिताः। गीताञ्जलिः वैदेशिकैः नोबुलपुरस्कारेण पुरस्कृतश्च। एवं बहूनि प्रशस्तानि पुस्तकानि बङ्गसाहित्याय प्रदत्तानि। कवीन्द्ररवीन्द्रस्य प्रतिभा कथासु, कवितासु, नाटकेषु, उपन्यासेषु, निबन्धेषु समानरूपेण उत्कृष्टा दृश्यते। सत्यमेव गीताञ्जलिः चित्राङ्गदा कलादृष्ट्या महाकवेरुभेऽपि रचने वैशिष्ट्यमावहतः।

द्वयधिकत्रिंशदधिकैकोनविंशे शततमे ईस्वीयाब्दे महात्मागान्धी पुणे कारागारेऽवरुद्धः आसीत्। ब्रिटिशशासकाः अनुसूचितजातीयानां सवर्णहिन्दूजातीयेभ्यः पृथक् निर्वाचनाय प्रयत्नशीलाः आसन्। यस्य स्पष्टमुद्देश्यं हिन्दूजातीयानां परस्परं विभाजनमासीत्। बहुविरोधे कृतेऽपि ब्रिटिशशासकाः शांतिं न लेभिरे विभाजयितुं च प्रयतमाना एवासन्। तदा महात्मागान्धी हिन्दुजातिष्वैक्यं स्थापयितुं कारागारे आमरणम् अनशनं प्रारभत। गुरुदेवस्य रवीन्द्रनाथस्य चानुमोदनमैच्छत्। यतश्च महात्मागान्धी गुरुदेवस्य रवीन्द्रस्य केवलमादरमेव नाकरोत् अपि तु यथाकालं समीचीनसम्मत्यै मुखमपि ईक्षते स्म। महात्मा एनं कवीन्द्रं रवीन्द्रं गुरुममन्यत। रवीन्द्रनाथः तन्त्रीपत्रे ''भारतस्य एकतायै सामाजिकाखण्डतायै च अमूल्य-जीवनस्य बलिदानं सर्वथा समीचीनम्, परं जनाः दारुणायाः विपत्तेः गान्धिनः जीवनमभिरक्षेयुः'' इति लिखित्वा प्रत्युदतरत्। रवीन्द्रः आमरणस्य अनशनस्य समर्थनमेव न कृतवानपि तु प्रायोपवेशने प्रारब्धे पुणे कारागारञ्चागतवान्।

एवं बहुवर्णिकं, गरिमामण्डितं, साहित्यिकं, सामाजिकं, दार्शनिकं, लोकतान्त्रिकं जीवनं तस्य काव्यमिव मनोहारि सर्वेभ्यः कल्याणकारि प्रेरणादायि चाभूत्। एकचत्वारिंशदधिकैकोनविंशे शततमे ईस्वीयाब्देऽगस्तमासस्य सप्तमे दिनांके (7 अगस्त, 1941) रवीन्द्रस्य पार्थिवं शरीरम् वैश्वानरम् प्राविशत्। अद्यापि गुरुदेवस्य रवीन्द्रस्य वाक् काव्यरूपेण अस्माकं समक्षं स्रोतस्विनी इव सततं प्रवहत्येव। अधुनापि करालस्य कालस्य करोऽपि वाचं मूकीकर्त्तुं नाशकत्।

**जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।**
**नास्ति येषां यशःकाये जरामरणजं भयम् ।।**

# काठिन्य निवारण

**आङ्ग्लवाङ्मये** = अंग्रेजी साहित्य में। **केनाविदितः** = कौन नहीं जानता। **प्राकटयत्** = प्रकट किया। **पुञ्जीभूतः** = एकत्र। **प्रासादः** = महल। **शिरस्कः** = शिखरवाला। **सविधं** = पास। **भृत्यबहुलं** = बहुत से नौकर वाले। **वन्दिपूर्णम्** = बन्धनयुक्त। **जीर्णः** = पुराना। **परिमातुम्** = नापना। **वातायने** = खिड़की में। **जलकुक्कवाकवः** = जलमुर्गियाँ। **कम्रं** = सुन्दर। **सरः** = तालाब। **सूनोः** = पुत्र। **सुशाद्वलानि** = हरे-भरे (सुन्दर घासवाले)। **प्रतिनिवृत्य** = लौटकर। **विधिशास्त्र** = कानूनशास्त्र। **अध्येतुं** = पढ़ने के लिए। **नैसर्गिकी** = स्वाभाविक। **प्रशस्तानि** = उत्तम। **प्रयतमाना** = प्रयत्नशील। **ईक्षते स्म** = देखते थे। **एनं** = इनको। **आगतवान्** = आये। **बहुवर्णिकं** = अनेक प्रकार का। **पार्थिवं** = भौतिक। **वैश्वानरम्** = अग्नि में। **स्रोतस्विनी** = नदी। **नाशकत्** = नहीं कर सका, समर्थ नहीं।

# अभ्यास प्रश्न

1. 'विश्वकविः रवीन्द्रः' पाठ का सारांश हिन्दी में लिखिए। **(2018HP, 19AO, AQ, 20MP, MQ)**
2. निम्नलिखित गद्यावतरणों का ससन्दर्भ हिन्दी में अनुवाद कीजिए–
   (क) आङ्ग्लवाङ्मये .................................. सर्वैः। **(2018AT)**
   (ख) भवनस्य वातायने .......................... अजायत।
   (ग) भवनस्य .......................... मनोरञ्जनमकरोत्।
   (घ) रवीन्द्रस्य प्राथमिकी .................... मनो न रेमे।
   (ङ) सप्तदशवर्षदेशीयो ........................... लब्धः।
   (च) एवम् ........................................ प्राविशत्।
   (छ) रवीन्द्रस्य साहित्यिक रचनायां ......... मुद्रयति स्म।
3. निम्नलिखित प्रश्नों के उत्तर हिन्दी में लिखिए–
   (क) रवीन्द्रनाथ को 'विश्वकवि' क्यों कहा जाता है?
   (ख) रवीन्द्र की सबसे प्रसिद्ध रचना कौन-सी है?
   (ग) विश्वकवि रवीन्द्र के बारे में आप क्या जानते हैं?
   (घ) 'गीताञ्जलि' के रचयिता का नाम लिखिए।
   (ङ) विधिशास्त्र का अध्ययन करने के लिए रवीन्द्रनाथ किसके साथ और कहाँ गये?
   (च) रवीन्द्रनाथ के ग्रन्थों के नाम लिखिए एवं नोबेल पुरस्कार से पुरस्कृत ग्रन्थ का भी नामोल्लेख कीजिए।
   (छ) कविवर रवीन्द्र का जन्म कब और कहाँ हुआ था?
   (ज) विश्वकवि रवीन्द्र के माता-पिता और जन्म-स्थान का नाम लिखिए।
   (झ) महाकवि रवीन्द्रनाथ टैगोर की साहित्यिक प्रतिभा पर प्रकाश डालिए।
   (ञ) 'विश्वकविः रवीन्द्रः' पाठ का सारांश लिखिए।
   (ट) 'विश्वकविः रवीन्द्रः' पाठ के आधार पर महात्मा गाँधी की दृष्टि में रवीन्द्रनाथ का क्या स्थान था?
4. निम्नलिखित प्रश्नों के संस्कृत में उत्तर दीजिए–
   (क) रवीन्द्रनाथस्य जन्म कुत्र अभवत्?
   (ख) गीताञ्जलिः कस्य रचना अस्ति?
   (ग) रवीन्द्रस्य प्राथमिकी शिक्षा कुत्र अभवत्?
   (घ) रवीन्द्रनाथस्य जन्म कदा अभवत्?
   (ङ) रवीन्द्रनाथस्य जनकः जननी के आस्ताम्?
5. निम्नलिखित शब्दों का प्रयोग संस्कृत-वाक्यों में कीजिए–
   भवन्ति, सान्ध्यसंगीतम्, महात्मा गान्धी, अनशनं, यथाकालं।

## ➨ आन्तरिक मूल्यांकन

विश्वकवि रवीन्द्र का जीवन-परिचय लिखिए।

●